# महाविद्या काली, तारा, षोडशी, भुवनेश्वरी, छिन्नमस्ता, धूमावती, बगलामुखी, मातंगी एवं कमला हृदय स्तोत्रम्




**SHRI RAJ VERMA JI**

**Contact-** +91-9897507933, +91-7500292413(WhatsApp No.)

**Email-** mahakalshakti@gmail.com

**For more info visit---**

देवता के नित्य पूजन में मन्त्र जप के साथ उनकी गायत्री, कवच, हृदय, शतनाम, सहस्रनाम एवं आरती को सम्मिलित कर उपासना करने से देवता के प्रति श्रद्धा, भक्ति एवं प्रेम की अभिवृद्धि होती है तथा अभीष्ट सिद्धि प्राप्त होती है। किसी भी देवता के हृदय स्तोत्र में देवता का हृदय ही वास करता है। हृदय स्तोत्र को विधिवत सिद्ध करने के पश्चात् त्रिकाल संध्या पाठ करने से मंत्र का प्रभाव अधिक होने के साथ देवता का सान्निध्य प्राप्त होता है। साधकजनों के हितार्थ हेतु महाविद्याओं के हृदय स्तोत्र का उल्लेख किया जा रहा है।

**श्रीकाली हृदय स्तोत्रम्-** विनियोग- ॐ अस्य श्रीदक्षिणकालिकाहृदयमन्त्रस्य श्रीमहाकाल ऋषिः, उष्णिक् छन्दः, श्रीदक्षिणकालिका देवता, ह्रीं बीजं, हूं शक्तिः, क्रीं कीलकं, श्रीमहाषोढारूपिणी महाकाल महिषा दक्षिण कालिका प्रसन्नार्थे पाठे विनियोगः।

ध्यानम्- चुच्छ्यामां कोटराक्षीं प्रलयघन घटां घोररूपां प्रचण्डां। दिग्वस्त्रां पिंगकेशीं डमरुसृणिधृतां खड्गपाशाभयानि।। नागं घंटां कपालं करसरसीरुहै कालिकां कृष्णवर्णां। ध्यायामि ध्येयमानां सकलसुखकरीं कालिकां तां नमामि।।

स्तोत्र- ॐ ऐं ह्रीं श्रीं क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं दक्षिणकालिके क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं स्वाहा। ॐ ऐं ह्रीं श्रीं हंसः सोहं अं आं ब्रह्मग्रन्थिं भेदय भेदय इं ईं विष्णुग्रन्थिं भेदय भेदय उं ऊं रुद्रग्रन्थिं भेदय भेदय अं क्रीं आं क्रीं इं क्रीं ईं हूं उं हूं ऊं ह्रीं ऋं ह्रीं ॠं दं लृं क्षिं लॄं णें एं कां ऐं लिं ओं कें औं क्रीं अं क्रीं अः क्रीं अं हूं आं हूं इं ह्रीं ईं ह्रीं उं स्वां ऊं हां यं हूं रं हूं लं मं वं हां सं कां षं लं सं प्रं हं सीं लं दं क्षं प्रं यं सीं रं दं लं ह्रीं वं ह्रीं शं स्वां षं हां शं हं लं क्षं महाकालभैरवि महाकालरूपिणी क्रीं

अनिरुद्धसरस्वति हूं हूं ब्रह्मग्रहबन्धिनि विष्णुग्रहबन्धिनि रुद्रग्रहबन्धिनि गोचरग्रहबन्धिनि आधिव्याधि ग्रहबन्धिनि सर्वदुष्टग्रहबन्धिनि सर्वदानवग्रहबन्धिनि सर्वदेवताग्रहबन्धिनि सर्वगोत्रदेवताग्रहबन्धिनि सर्वग्रहोपग्रहबन्धिनि क्रीं कालि क्रीं कपालिनि क्रीं कुल्ले हूं कुरुकुल्ले हूं विरोधिनी ह्रीं विप्रचित्ते ह्रीं उग्रे क्रीं उग्रप्रभे क्रीं दीप्ते क्रीं नीले हूं घने हूं बलाके ह्रीं मात्रे ह्रीं मुद्रे।

ॐ मिते असिते असितकुसुमोपमे हूं हुंकारि कां कां काकिनि लां लां लाकिनि हां हां हाकिनि क्षिस क्षिस भ्रम भ्रम उत्तरतत्त्वविग्रह स्वरूपे अमले विमले अजिते अपराजिते क्रीं क्रीं स्त्रीं हूं हूं फ्रें फ्रें दुष्टविद्राविणि आं ब्राह्मि ईं वैष्णवि ऊं माहेशि ॠं चामुण्डे लृं कौमारि ऐं अपराजिते औं वाराहि अं नारसिंहि ऐं ह्रीं क्लीं चामुण्डाये विच्चे श्रीं महालक्ष्मि हूं हूं पंचप्रेतोपरिस्थिताये शवालंकाराये चिन्तान्तस्थाये भैं भद्रकालिके दुष्टान विदारय विदारय मम दारिद्र्यं हन हन पापं मथ मथ आरोग्यं कुरु कुरु विरूपाक्षि विरूपाक्षवरदायिनि अष्टभैरवरूपे ह्रीं नवनाथात्मिके।

ॐ ह्रीं ह्रीं शक्ति रां रां राकिनि लां लां लाकिनि ह्रां ह्रां हाकिनि कां कां काकिनि क्षिस क्षिस वद वद उत्तरतत्त्वविग्रहे कराल स्वरूपे आदिविद्ये महाकालमहिषि क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं दक्षिणकालिके क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं स्वाहा। ॐ ऐं ह्रीं श्रीं ॐ क्रीं हूं ह्रीं

मम पुत्रान् रक्ष रक्ष ममोपरि दुष्टबुद्धिम् दुष्ट प्रयोगान् कुर्व्वन्ति कारयन्ति करिष्यन्ति तान् हन हन मम मंत्रसिद्धिं कुरु कुरु मम दुष्टं विदारय विदारय मम दारिद्र्यं हन हन पापं मथ मथ आरोग्यं कुरु कुरु आत्मतत्वं देहि देहि हंसः सोहम् क्रीं क्रीं हूं हूं ह्रीं ह्रीं स्वाहा। नवकोटिस्वरूपे आद्ये आदिविद्ये अनिरुद्धसरस्वति स्वात्मचैतन्यं देहि देहि मम हृदये तिष्ठ तिष्ठ मम मनोरथं कुरु कुरु स्वाहा।

---

**श्रीतारा हृदय स्तोत्रम्– विनियोग–** ॐ अस्य श्रीमद्उग्रताराहृदयस्तोत्रमंत्रस्य श्रीभैरव ऋषिः, अनुष्टुप् छन्दः, श्रीमद्उग्रतारादेवता, स्त्रीं बीजं, हूं शक्तिः, नमः कीलकं सकल शत्रुविनाशार्थे पाठे विनियोगः।

**षडंगन्यास–** ॐ स्त्रीं हृदयाय नमः। ॐ ह्रीं शिरसे स्वाहा। ॐ हूं शिखायै वषट्। ॐ त्रीं कवचाय हुम्। ॐ ऐं नेत्रत्रयाय वौषट्। ॐ हंसः अस्त्राय फट्।

**ध्यानम्–** ॐ ध्यायेत्कोटिदिवाकर द्युतिनिभां बालेन्दुयुक्छेखरां, रक्तांगीं रसनां सुरक्तवसनां पूर्णेन्दुबिम्बाननाम्। पाशं कर्तिमहांकुशादि दधतीं दोर्भिश्चतुर्भिर्युतां, नानाभूषणभूषितां भगवतीं तारां जगत्तारिणीम्।।

**स्तोत्र–** एवं ध्यात्वा शुभां तारां ततस्तु हृदयं पठेत्। तारिणी तत्त्वनिष्ठानां सर्वतत्त्वप्रकाशिका।।

रामाभिन्ना पराशक्तिः शत्रुनाशं करोतु मे। सर्वदा शत्रुसंरम्भे तारा मे कुरुतां जयम्।।

स्त्रीं स्त्रीं स्वरूपिणी देवि त्रिषु लोकेषु विश्रुता। तव स्नेहान्मयाख्यातं न पैशुन्यं प्रकाश्यताम्।।

श्रृणु देवि! तव स्नेहात्तारानामानि तत्त्वतः। वर्णयिष्यामि गुप्तानि दुर्लभानि जगत्त्रये।।

तारिणी तरला तारा त्रिरूपा तरणिप्रभा। सत्त्वरूपा महासाध्वी सर्वसज्जनपालिका।।

रमणीया रजोरूपा जगत्सृष्टिकरी परा। तमोरूपा महामाया घोररावा भयानका।।

कालरूपा कालिकाख्या जगद्विध्वंसकारिका। तत्त्वज्ञानपरानन्दा तत्त्वज्ञानप्रदाऽनघा।।

रक्तांगी रक्तवस्त्रा च रक्तमालाप्रशोभिता। सिद्धिलक्ष्मीश्च ब्रह्माणी महाकाली महालया।।

नामान्येतानि ये मर्त्त्याः सर्वदैकाग्रमानसाः। प्रपठन्ति प्रिये तेषां किंकरत्वं करोम्यहम्।।

तारां तारपरां देवीं तारकेश्वर पूजिताम्। तारिणीं भवपाथोधेरुग्रतारां भजाम्यहम्।।

स्त्रीं ह्रीं हूं त्रीं फण्मंत्रेण जलं जप्त्वाऽभिषेचयेत्। सर्वेरोगाः प्रणश्यन्ति सत्यं सत्यं वदाम्यहम्।।

त्रीं स्वाहान्तैर्महामंत्रैश्चन्दनं साधयेत्ततः। तिलकं कुरुते प्राज्ञो लोको वश्यो भवेत्प्रिये।।

स्त्रीं ह्रीं त्रीं स्वाहा मंत्रेण श्मशानं भस्ममंत्रयेत्। शत्रोर्गृहे तत्प्रक्षेपाच्छत्रोर्मृत्युर्भविष्यति।।

ह्रीं ह्रूं स्त्रीं फंडत मन्त्रैः पुष्पं संशोध्य सप्तधा। उच्चाटनं नयत्याशु रिपूणां नैव संशयः।।

स्त्रीं त्रीं ह्रीं मन्त्रवर्येन अक्षताश्चाभिमंत्रिताः। तत्प्रतिक्षेपमात्रेण शीघ्रमायाति मानिनी।।

(हंसः ॐ ह्रीं स्त्रीं हूं हंसः) इति मंत्रेण जप्तेन शोधितं कज्जलं प्रिये। तस्यैव तिलकं कृत्वा जगन्मोहं समाचरेत्।।

ताराया हृदयं देवि सर्वपापप्रणानाशनम्। वाजपेयादियज्ञानां कोटिकोटिगुणोत्तराम्।।

गंगादि सर्वतीर्थानां फलं कोटिगुणात्स्मृतम्। महाःदुखे महारोगे संकटे प्राणसंशये।।

महाभये महाघोरे पठेत्स्तोत्रं महोत्तमम्। सत्यं सत्यं मयोक्तं ते पार्वति प्राणवल्लभे।। गोपनीयं प्रयत्नेन न प्रकाश्यमिदं क्वचित्।

---

Shri Raj verma ji
09897507933, 07500292413

**श्रीषोडशी हृदय स्तोत्रम्- विनियोग-** ॐ अस्य श्रीमहात्रिपुरसुन्दरीहृदयस्तोत्रमंत्रस्य श्रीआनन्दभैरव ऋषिः, देवी गायत्रीश्छन्दः, श्रीमहात्रिपुरसुन्दरी देवता, ऐं बीजं, सौः शक्तिः, क्लीं कीलकं, धर्मार्थकाममोक्षार्थे पाठे विनियोगः।

**ऋष्यादिन्यास-** श्रीआनन्दभैरवाय ऋषये नमः शिरसि। देवी गायत्रीछन्दसे नमः मुखे। श्रीमहात्रिपुरसुन्दरी देवतायै नमः हृदये। ऐं बीजाय नमः लिंगे। सौः शक्तये नमः नाभौ। क्लीं कीलकाय नमः मूलाधारे। धर्मार्थकाममोक्षार्थे विनियोगाय नमः सर्वांगे।

**षडंगन्यास-** ऐं ह्रीं क्लीं - अंगुष्ठाभ्यां नमः - हृदयाय नमः। क्लीं श्रीं सौः ऐं - तर्जनीभ्यां नमः - शिरसे स्वाहा। सौः ॐ ह्रीं श्रीं - मध्यमाभ्यां नमः - शिखायै वषट्। ऐं कएईलह्रीं हसकहलह्रीं - अनामिकाभ्यां नमः - कवचाय हुं। क्लीं सकलह्रीं - कनिष्ठिकाभ्यां नमः - नेत्रत्रयाय वौषट्। सौः सौः ऐं क्लीं ह्रीं श्रीं - करतलकरपृष्ठाभ्यां नमः - अस्त्राय फट्।

**ध्यानम्-** बालव्यक्त विभाकरामितनिभां भव्यप्रदां भारतीम्, ईषत् फुल्लमुखाम्बुजस्मित् करैराशाभवान्धापहाम्। पाशं साभयमंकुशं च वरदं सम्बिभ्रतीं भूतिदाम्, भ्राजन्तीं चतुरम्बुजाकृति करैर्भक्त्या भजे सुन्दरीम्।।

स्तोत्रम्- सुन्दरी सकल कल्मषापहा कोटिकंजप्रिय काम्यकान्तिका। कोटि कल्पकृत पुण्य कर्मणा पूजनीय पदपुण्यपुष्करा।1।

शर्वरीश सम सुन्दरानना श्रीशशक्ति सुकृताश्रय श्रिता। सज्जनानु शरणीय सत्पदा संकटे सुरगणैः सुवन्दिता।2।

या सुरासुररणे जयान्विता आजघान जगदम्बिकाऽजिता। तां भजामि जगतां जनिं जयां युद्धयुक्त दितजान् सुदुर्जयान्।3।

योगिनां हृदय संगतां शिवां योगयुक्त मनसां यतात्मनाम्। जाग्रतीं जगति यत्नतो द्विजा यां जपन्ति हृदि तां भजाम्यहम्।4।

कल्पकास्तु कलयन्ति कालिकां यत् कला कलि जनोपकारिकाम्। कौल कालि कलितांघ्रि कञ्जकां तां भजामि कलिकल्मषापहाम्।5।

बालार्कानन्त शोचिर्निज तनु किरणैर्दीपयन्तीं दिगन्तान्, दीप्तैर्देदीप्यमानां दनुज दल वनानल्प दावानलाभाम्। दान्तो दन्तोग्रचित्तान् दलितदितिसुतान् दर्शनीयान् दुरन्तान्, देवीं दीनार्द्रचित्तान् हृदि मुदितमनाः सुन्दरीं संस्मरामि।6।

धीरान् धन्यान् धरित्रीं धवविधृत शिरोधूत धूल्यब्ज पादान्, धृष्टान् धाराधराधो विनिधृत चपला चारु चन्द्रत् प्रभाभाम्। धर्मान् धूतोपहारान् धरणि सुरधवोद्धारिणीं ध्येय रूपाम्, धीमद्धन्याऽतिधन्यां धनद धनवृतां सुन्दरीं चिन्तयामि।7।

जयतु जयतु जल्पा योगिनी योगयुक्ता जयतु जयतु सौम्या सुन्दरी सुन्दरास्या। जयतु जयतु पद्मा पद्मिनी केशवस्य जयतु जयतु काली कालिनी कालकान्ता।8।

जयतु जयतु खर्वा षोडशी वेदहस्ता जयतु जयतु धात्री धर्मिणी धातृशक्तिः। जयतु जयतु वाणी ब्राह्मणा ब्रह्मवन्द्या जयतु जयतु दुर्गा दारिणी देवशत्रोः।9।

देवी त्वं सृष्टिकाले कमलभवभृता राजसी रक्तरूपा, रक्षाकाले त्वमम्बा हरिहृदय धृता सात्विकी श्वेतरूपा। भूरि क्रोधा भवान्ते भवभवन गता तामसी कृष्णरूपा, एताश्चान्यास्त्वमेव क्षितिमनुज मता सुन्दरी केवलाद्या।10।

सुमल सुमनमेतद् देवि गोप्यं गुणज्ञे ग्रहण मनन योग्यं षोडशीयं खलघ्नम्। सुरतरुसमशीलं सम्प्रदं पाठकानां प्रभवति हृदयाख्यं स्तोत्रमत्यन्त मान्यम्।11।

इदं त्रिपुरसुन्दर्याः षोडश्याः परमाद्भुतं यः श्रृणोति नरः स्तोत्रं स सदा सुखमश्नुते।12।

---

**श्रीभुवनेश्वरी हृदय स्तव- विनियोग-** ॐ अस्य श्रीभुवनेश्वरी हृदयस्तोत्रस्य श्रीशक्तिः ऋषिः, गायत्री छन्दः, श्रीभुवनेश्वरी देवता, हं

बीजं, ईं शक्तिः, रं कीलकं, सकलमनोवांछित सिद्ध्यर्थे पाठे विनियोगः।

ऋष्यादिन्यास- श्रीशक्ति ऋषये नमः शिरसि। गायत्री छन्दसे नमः मुखे। श्रीभुवनेश्वरी देवतायै नमः हृदि। हं बीजाय नमः गुह्ये। ईं शक्तये नमः नाभौ। रं कीलकाय नमः पादयोः। सकल मनोवांछित सिद्धयर्थे पाठे विनियोगाय नमः सर्वांगे।

षडंगन्यास- ह्रीं श्रीं ऐं - अंगुष्ठाभ्यां नमः - हृदयाय नमः। ह्रीं श्रीं ऐं - तर्जनीभ्यां नमः - शिरसे स्वाहा। ह्रीं श्रीं ऐं - मध्यमाभ्यां नमः - शिखायै वषट्। ह्रीं श्रीं ऐं - अनामिकाभ्यां नमः - कवचाय हुं। ह्रीं श्रीं ऐं - कनिष्ठिकाभ्यां नमः - नेत्रत्रयाय वौषट्। ह्रीं श्रीं ऐं - करतलकरपृष्ठाभ्यां नमः - अस्त्राय फट्।

ध्यानम्- ध्यायेद् ब्रह्मादिकानां कृतजनि जननी योगिनीं योग योनिम्।

देवानां जीवनायोज्जवलित जय पर ज्योतिरुग्रांग धात्रीम्।। शंखं चक्रं च बाणं धनुरपि दधतीं दोश्चतुष्काम्बुजातैः। मायामाद्यां विशिष्टां भव भव भुवनां भूभवा भार भूमिम्।।

स्तोत्रम्- यदाज्ञया यो जगदाद्यशेषं सृजत्यजः श्रीपतिरौरसं वा। बिभर्ति संहन्ति भवस्तदन्ते भजामहे श्रीभुवनेश्वरीं ताम्।1।

जगज्जनानन्द करीं जयाख्यां यशस्विनीं यन्त्रसुयज्ञ योनिम्। जितामितामित्र कृत प्रपंचां भजामहे श्रीभुवनेश्वरीं ताम्।2।

हरौ प्रसुप्ते भुवनत्रयान्ते अवातरन्नाभिज पद्मजन्मा। विधिस्ततोऽब्धे विदधार यत्पदं भजामहे श्रीभुवनेश्वरीं ताम्।3।

न विद्यते क्वापि तु जन्म यस्या न स्थितिः सान्ततिकीह यस्याः। न वा निरोधेऽखिलकर्म यस्याः भजामहे श्रीभुवनेश्वरीं ताम्।4।

कटाक्ष मोक्षा चरणोग्रवित्ता निवेशितार्णाः करुणार्द्रचित्ता। सुभक्तये एति समीप्सितं या भजामहे श्रीभुवनेश्वरीं ताम्।5।

यतो जगज्जन्म बभूव योनेस्तदेव मध्ये प्रतिपाति यां वा। तदत्ति यान्तेऽखिलमुग्र काली भजामहे श्रीभुवनेश्वरीं ताम्।6।

सुषुप्तिकाले जनमध्ययन्त्या यया जनः स्वप्नमवैति किंचित्। प्रबुध्यते जाग्रति जीव एष भजामहे श्रीभुवनेश्वरीं ताम्।7।

दयास्फुरत् कोरकटाक्ष लाभान्नैकत्र यस्या प्रलभन्ति सिद्धाः। कवित्वमीशित्वमपि स्वतन्त्रा भजामहे श्रीभुवनेश्वरीं ताम्।8।

लसन्मुखाम्भोरुहमुत् स्फुरन्तं हृदि प्रणिध्याय दिशि स्फुरन्तः। यस्याः कृपार्द्रं प्रविकाशयन्ति भजामहे श्रीभुवनेश्वरीं ताम्।9।

यदानुरागानुगतालि चित्राश्चिरन्तन प्रेम परिप्लुतांगाः। सुनिर्भयाः सन्ति प्रमुद्य यस्याः भजामहे श्रीभुवनेश्वरीं ताम्।10।

हरिर्विरन्चिर्हर ईशितारः पुरोऽवतिष्ठन्ति परव्रतांगाः। यस्या समिच्छन्ति सदानुकूल्यं भजामहे श्रीभुवनेश्वरीं ताम्।11।

मनुं यदीयं हरमग्निसंस्थं ततश्च वामश्रुति चन्द्रसक्तम्। जपन्ति ये स्युः सुरवन्दितास्ते भजामहे श्रीभुवनेश्वरीं ताम्।।12।

प्रसीदतु प्रेमरसार्द्र चित्ता सदा हि सा श्रीभुवनेश्रीं मे। कृपा कटाक्षेण कुबेर कल्पा भवन्ति यस्याः पदभक्तिः भाजः।।13।

मुदा सुपाठ्यं भुवनेश्वरीयं सदा सतां स्तोत्रमिदं सुसेव्यं। सुखप्रदं स्यात् कलिकल्मषघ्नं सुश्रृण्वतां सम्पठतां प्रशस्यम्।।14।

एतत्तु हृदय स्तोत्रं पठेद् यस्तु समाहितः। भवेत् तस्येष्टदा देवी प्रसन्ना भुवनेश्वरी।।15।

ददाति धनमायुष्यं पुण्यंपुण्यमतिं तथा। नैष्ठिकीं देवभक्तिं च गुरु भक्तिं विशेषतः।।16।

पूर्णिमायां चतुर्दश्यां कुजवारे विशेषतः। पठनीयमिदं स्तोत्रं देवसद्मनि यत्नतः।।17।

यत्रकुत्रापि पाठेन स्तोत्रस्यास्य फलं भवेत्। सर्वस्थानेषु देवेश्याः पूतदेहः सदा पठेत्।।18।

---

**श्रीछिन्नमस्ता हृदय स्तोत्रम्- विनियोग-** ॐ अस्य श्रीछिन्नमस्ताहृदयस्तोत्रमन्त्रस्य श्रीभैरव ऋषिः, सम्राट छन्दः, श्रीछिन्नमस्ता देवता, हूं बीजं, ॐ शक्तिः, ह्रीं कीलकम्, शत्रुक्षयकरणार्थे पाठे विनियोगः।

ऋष्यादिन्यास- ॐ भैरव ऋषये नमः शिरसि। सम्राट छन्दसे नमः मुखे। छिन्नमस्ता देवतायै नमः हृदि। हूं बीजाय नमः गुह्ये। ॐ शक्तये नमः पादयोः। ह्रीं कीलकाय नमो नाभौ। विनियोगाय नमः सर्वांगे।

षडंगन्यास- ॐ - अंगुष्ठाभ्यां नमः - हृदयाय नमः। ॐ हूं - तर्जनीभ्यां नमः - शिरसे स्वाहा। ॐ ह्रीं - मध्यमाभ्यां नमः- शिखायै वषट्। ॐ ऐं - अनामिकाभ्यां नमः - कवचाय हुम्। ॐ क्लीं - कनिष्ठिकाभ्यां नमः - नेत्रत्रयाय वौषट्। ॐ हूं - करतलकरपृष्ठाभ्यां नमः - अस्त्राय फट्।

ध्यानम्- रक्ताभां रक्तकेशीं करकमललसत्कर्त्रिकां कालकांतिं, विच्छिन्नात्मीय मुण्डासृगरुण बहुलोदग्रधारां पिंबतीम्। विघ्नाभ्रौघप्रचण्डश्वसनसमनिभां सेवितां सिद्धसंघैः पद्माक्षीं, छिन्नमस्तां छलकरदितिजच्छेदिनीं संस्मरामि।।

स्तोत्रम्- वन्देऽहं छिन्नमस्तां तां छिन्नमुण्डधरां पराम्। छिन्नग्रीवोच्छटाच्छन्नां क्षौमवस्त्रपरिच्छदाम्।।

सर्वदा सुरसंघेन सेवितां घ्रिसरोरुहाम्। सेवेसकल सम्पत्त्यै छिन्नमस्तां शुभप्रदाम्।।

यज्ञानां योगयज्ञाय या तु जाता युगे युगे। दानवांतकरीं देवीं छिन्नमस्तां भजामि ताम्।।

वैरोचनीं वरारोहां वामदेवविवर्द्धिताम्। कोटिसूर्य्यप्रभां वंदे विद्युद्वर्णाक्षिमण्डिताम्।।

निजकण्ठोच्छलद्रक्तधारया या मुहुर्मुहुः। योगिनीस्तर्पयन्त्युग्रा तस्याश्चरणमाश्रये।।

हूमित्येकाक्षरं मंत्रं यदयि युक्तमानसः। यो जपेत्तस्य विद्वेषी भस्मतां याति तां भजे।।

हूं स्वाहेति मनुं सम्यग्यः स्मरत्यर्तिमान्नरः। छिनत्ति च्छिन्नमस्ताया तस्य बाधां नमामिताम्।।

यस्याः कटाक्षमात्रेण क्रूरभूतादयो द्रुतम्। दूरतः सम्पलायंते च्छिन्नमस्तां भजामि ताम्।।

क्षितितलपरिरक्षाक्षांतरोषा सुदक्षा छलयुतखलकक्षाच्छेदने क्षांतिलक्ष्या। क्षितिदितिजसुपक्षा क्षोणिपाक्षय्यशिक्षा जयतु जयतु चाक्षा च्छिन्नमस्तारिभक्षा।।

कलिकलुषकलानां कर्त्तने कर्त्रिहस्ता सुरकुवलयकाक्षा मन्दभानुप्रकाशा।

असुरकुलकलापत्रासिकाऽम्लान मूर्तिर्जयतु जयतुकाली छिन्नमस्ता कराली।।

भुवनभरणभूरिभ्राजमानानुभावा भवभवविभवानां भारणोद्भातभूतिः। द्विजकुलकमलानां भासिनी भानुमूर्तिर्भवतु भवतु वाणी छिन्नमस्ता भवानी।।

मम रिपुगणमाशु च्छेत्तुमुग्रं कृपाण सपदि, जननि तीक्ष्णं छिन्नमुण्डं गृहाण।

भवतु तव यशोऽलं छिंधि शत्रून्खलान्मे मम च परिदिशेष्टं छिन्नमस्ते क्षमस्व।।

छिन्नग्रीवा छिन्नमस्ता छिन्नमुण्ड धराऽक्षता क्षोदक्षेमकरी स्वक्षा क्षोणीशाच्छादनक्षमा।।

वैरोचनी वरारोहा बलिदानप्रहर्षिता, बलिपूजितपादाब्जा वासुदेवप्रपूजिता।।

इति द्वादशनामानि च्छिन्नमस्ताप्रियाणि यः स्मरेत्प्रातः समुत्थाय तस्य नश्यन्ति शत्रवः।।

यां स्मृत्वा संति सद्यः सकलसुरगणाः सर्वदा सम्पदाढ्याः शत्रूणां संघमाहत्य विशदवदनाः स्वस्थचित्ताः श्रयंति।

तस्याः संकल्पवंतः सरसिजचरणं संततं संश्रयंति साऽद्या श्रीशादिसेव्या सुफलतु सुतरां छिन्नमस्ता प्रशस्ता।।

इदं हृदयमज्ञात्वा हंतुमिच्छति यो द्विषम्। कथं तस्याचिरं शत्रुर्नाशमेष्यति पार्वति।।

यदीच्छेन्नाशनं शत्रोः शीघ्रमेतत्पठेन्नरः छिन्नमस्ता प्रसन्ना हि ददाति फलमीप्सितम्।।

शत्रुप्रशमनं पुण्यं समीप्सितफलप्रदम आयुरारोग्यदं चैव पठतां पुण्यसाधनम्।।

---

**श्रीधूमावती हृदय स्तोत्रम्- विनियोग-** ॐ अस्य श्रीधूमावतीहृदय स्तोत्रमन्त्रस्य पिप्पलाद ऋषिः, अनुष्टुप् छन्दः, श्रीधूमावती देवता, धूं बीजम्, ह्रीं शक्तिः, क्लीं कीलकम्, सर्वशत्रुसंहरणे पाठे विनियोगः।

**षडंगन्यास-** ॐ धां - अंगुष्ठाभ्यां नमः - हृदयाय नमः। ॐ धीं - तर्जनीभ्यां नमः - शिरसे स्वाहा। ॐ धूं - मध्यमाभ्यां नमः - शिखायै वषट्। ॐ धैं - अनामिकाभ्यां नमः - कवचाय हुम्। ॐ धौं - कनिष्ठिकाभ्यां नमः - नेत्रत्रयाय वौषट्। ॐ धः - करतलकरपृष्ठाभ्यां नमः - अस्त्राय फट्।

**ध्यानम्-** धूम्राभां धूम्रवस्त्रां प्रकटितदशनां मुक्तवालां वराढ्यां, काकांकस्यन्दनस्थां धवलकरयुगां शूर्पहस्तातिरूक्षाम। नित्यं क्षुत्क्षामदेहां मुहुरतिकुटिलां वारिवांछाविचित्रां, ध्यायेद् धूमावतीं वामनयनयुगलां भीतिदां भीषणास्याम्।।

**स्तोत्रम्-** कल्पादौ या कालिकाद्याऽचीकलन्मधुकैटभौ। कल्पांते त्रिजगत्सर्वं धूमावतीं भजामि ताम्।।

गुणागाराऽगम्यगुणा या गुणागुणवर्द्धिनी। गीतावेदार्थतत्त्वज्ञैर्धूमावतीं भजामि ताम्।।

खट्वांगधारिणी खर्वा खण्डिनीखलरक्षसाम्। धारिणी खेटकस्यापि धूमावतीं भजामि ताम्।।

घूर्णा घूर्णकरा घोरा घूर्णिताक्षी घनस्वना। घातिनी घातकानां या धूमावतीं भजामि ताम्।।

चर्वंतीमस्थिखण्डानां चण्डमुण्डविदारिणीम्। चण्डाट्टाहासिनीं देवीं भजे धूमवतीमहम्।।

छिन्नग्रीवां क्षताच्छन्नां छिन्नमस्तस्वरूपिणीम्। छेदिनीं दुष्टसंघानां भजे धूमावतीमहम्।।

जाता या याचिता देवैरसुराणां विघातिनी। जल्पंती बहु गर्जंती भजे तां धूम्ररूपिणीम्।।

झंकारकारिणीं झंझां झंझमाझमवादिनीम्। झटित्याकर्षिणीं देवीं भजे धूमावतीमहम्।।

टीपटंकार संयुक्तां धनुषटंकारकारिणीम्। घोरां घनघटाटोपां वंदे धूमावतीमहम्।।

ठं ठं ठं ठं मनुप्रीतिं ठः ठः मन्त्रस्वरूपिणीम्। ठमकाह्वगति प्रीतांभजे धूमावतीमहम्।।

डमरु डिंडिमारावां डाकिनीगणमण्डिताम्। डाकिनीभोगसन्तुष्टां भजे धूमावतीमहम्।।

ढक्कानादेन संतुष्टां ढक्कावादकसिद्धिदाम्। ढक्कावादचलच्चित्तां भजे धूमावतीमहम्।।

तत्त्ववार्त्ताप्रियप्राणां भवपाथोधितारिणीम्। तारस्वरूपिणीमं तारां भजे धूमावतीमहम्।।

थां थीं थूं थें मंत्ररूपां थैं थौं थं थः स्वरूपिणीम्। थकारवर्णसर्वस्वां भजे धूमावतीमहम्।।

दुर्गास्वरूपिणीम् देवीं दुष्टदानवदारिणीम्। देवदैत्यकृतध्वंसां वंदे धूमावतीमहम्।।

ध्वांताकारांधकध्वंसां मुक्तधम्मिलधारिणीम्। धूमधाराप्रभां धीरां भजे धूमावतीमहम्।।

नर्तकीनटनप्रीतां नाट्यकर्म्मविवर्द्धिनीम्। नारसिंहीं नराराध्यां नौमि धूमावतीमहम्।।

पार्वतीपतिसंपूज्यां पर्वतोपरिवासिनीम्। पद्मारूपां पद्मपूजां नौमि धूमावतीमहम्।।

फूत्कारसहितश्वासां फट्मंत्रफलदायिनीम्। फेत्कारिगणसंसेव्यां सेवे धूमावतीमहम्।।

बलिपूज्यां बलाराध्यां बगलारूपिणीम् वराम्। ब्रह्मादिवंदितां विद्यां वंदे धूमावतीमहम्।।

भव्यरूपां भवाराध्यां भुवनेशीस्वरूपिणीम्। भक्तभव्यप्रदां देवीं भजे धूमावतीमहम्।।

मायां मधुमतीं मान्यां मकरध्वजमानिताम्। मत्स्यमांसमहास्वादां मन्ये धूमावतीमहम्।।

योगयज्ञप्रसन्नास्यां योगिनीपरिसेविताम्। यशोदां यज्ञफलदां यजे धूमावतीमहम्।।

रामाराध्यपदद्वंदा रावणध्वंसकारिणीम्। रमेशरमणीं पूज्यामहं धूमावतीं श्रये।।

लक्षलीलाकलालक्ष्यां लोकवंद्यपदांबुजाम्। लंबितां बीजकोशाढ्यां वंदे धूमावतीमहम्।।

वकपूज्यपदांभोजां वकध्यानपरायणाम्। बालां बकारिसंध्येयां वंदे धूमावतीमहम्।।

शांकरीं शंकरप्राणां संकटध्वंसकारिणीम्। शत्रुसंहारिणीं शुद्धां श्रये धूमावतीमहम्।।

षडाननारिसंहंत्रीं षोडशीरूपधारिणीम्। षड्रसास्वादिनीं सौम्यां सेवे धूमावतीमहम्।।

सुरसेवितपादाब्जां सुरसौख्यप्रदायिनीम्। सुन्दरीगणसंसेव्यां सेवे धूमावतीमहम्।।

हेरम्बजननीं योग्यां हास्यलास्यविहारिणीम्। हारिणीं शत्रुसंघानां सेवे धूमावतीमहम्।।

क्षीरोदतीरसंवासां क्षीरपानप्रहर्षिताम्। क्षणदेशेज्यपादाब्जां सेवे धूमावतीमहम्।।

चतुस्त्रिंशद्वर्णकानां प्रतिवर्णादिनामभिः। कृतं तु हृदयं स्तोत्रं धूमावत्याः सुसिद्धिदम्।।

य इदं पठति स्तोत्रं पवित्रं पापनाशनम्। स प्राप्नोति परां सिद्धिं धूमावत्याः प्रसादतः।।

पठन्नेकाग्रचित्तो यो यद्यदिच्छति मानवः। तत्सर्वं समवाप्नोति सत्यं सत्यं वदाम्यहम्।।

---

**श्रीबगलामुखी हृदय स्तोत्रम्- विनियोग-** ॐ अस्य श्रीबगलामुखीहृदयामालामंत्रस्य श्रीनारद ऋषिः, अनुष्टुप् छन्दः, श्री बगलामुखी देवता, ह्लीं बीजं, क्लीं शक्तिः, ऐं कीलकम्, श्रीबगलामुखीवरप्रसादसिद्ध्यर्थे जपे विनियोगः।

करन्यास- ॐ ह्लीं अगुंष्ठाभ्यां नमः। ॐ क्लीं तर्जनीभ्यां नमः। ॐ ऐं मध्यमाभ्यां नमः। ॐ ह्लीं अनामिकाभ्यां नमः। ॐ क्लीं कनिष्ठिकाभ्यां नमः। ॐ ऐं करतलकरपृष्ठाभ्यां नमः।

हृदयादिन्यास- ॐ ह्लीं हृदयाय नमः। ॐ क्लीं शिरसे स्वाहा। ॐ ऐं शिखायै वषट्। ॐ ह्लीं कवचाय हुम्। ॐ क्लीं नेत्रत्रयाय वौषट्। ॐ ऐं अस्त्राय फट्। ॐ ह्लीं क्लीं ऐं इति दिग्बन्धन।

ध्यानम्- पीताम्बरां पीतमाल्यां पीताभरणभूषितां। पीतकंज पदद्वन्द्वां बगलां चिन्तयेऽनिशम्।।

ध्यान करके पूजा करें- पीतशंख गदाहस्ते पीतचन्दन चर्चिते। बगले मे वरं देहि शत्रुसंघविदारिणी।।

इसके पश्चात् निम्न मंत्र की एक माला करें- 'ॐ ह्लीं क्लीं ऐं बगलामुख्यै गदाधारिण्यै प्रेतासनाध्यासिन्यै स्वाहा।'

स्तोत्रम्- वन्देऽहं बगलां देवीं पीतभूषण भूषिताम्। तेजोरूपमयीं देवीं पीततेजः स्वरूपिणीम्।1।

गदाभ्रमणभिन्नाभ्रां भ्रुकुटि भीषणाननाम्। भीषयन्तीं भीमशत्रुन् भजे भव्यस्य भक्तिदाम्।2।

पूर्णचन्द्र समानास्यां पीतगन्धानुलेपनाम्। पीताम्बर परिधानां पवित्रामाश्रयाम्यहम्।3।

पालयन्तीमनुपलं प्रसमीक्ष्याऽवनीतले। पीताचाररतां भक्तां स्ताम्भवानीं भजाम्यहम् ।4।

पीतपद्मपदद्वन्द्वां चम्पकारण्य रूपिणीम्। पीतवतंसां परमां वन्दे पद्मजवन्दिताम् ।5।

लसच्चारुसिंजत्सुमंजीरपादां चलत्स्वर्णकर्णावतंसाञ्चितास्याम्। वलत्पीत चन्द्राननां चन्द्रवंद्या भजे पद्मजादीड्यसत्पादपद्माम् ।6।

सुपीताभयामालया पूतमन्त्रं परं ते जपन्तो जयं संलभन्ते। रणे रागरोषाप्लुतानां रिपुणां विवादे बलाद्वैरकृद्घातमातः ।7।

भरत्पीतभास्वत्प्रभाहस्कराभां गदागंजितामित्रगर्वां गरिष्ठाम्। गरीयो गुणागारगात्रां गुणाढ्यां गणेशादिगम्यां श्रये निर्गुणाढ्याम् ।8।

जना ये जपन्त्युग्रबीजं जगत्सु परं प्रत्यहं वे स्मरन्तः स्वरूपम्। भवेद् वादिनां वाङ्मुखस्तम्भ आद्ये जयो जायते जल्पतामाशु तेषाम् ।9।

तव ध्याननिष्ठाप्रतिष्ठात्मप्रज्ञावतां पादपद्मार्चने प्रेमयुक्ताः। प्रसन्ना नृपाः प्राकृताः पण्डिता वा पुराणादिका दासतुल्या भवन्ति।10।

नमामस्ते मातः कनककमनीयांघ्रिजलजम्। बलद्विद्युद्वर्णं घनतिमिरविध्वंसकरणम्।। भवाब्धौ मग्नात्मोत्तरणकरणं सर्वशरणम्। प्रपन्नानां मातर्जगति बगले दुःखदमनम् ।11।

ज्वलज्जयोत्स्ना रत्नाकरमणिविभुषिक्तांक भवनम्। स्मरामस्ते धाम स्मरहरहरीन्द्रेन्दु प्रमुखैः।।

अहोरात्रं प्रातः प्रणयनवनीयं सुविशदम्। परं पीताकारं परिचितमणिद्वीपवसनम्।।12।

वदामस्ते मातः! श्रुतिसुखकरं नाम ललितं। लसन्मात्रावर्णा जगति बगलेति प्रचरितम्।।

चलन्तस्तिष्ठन्तो वयमुपविशन्तोऽपि शयने। भजामोयच्छ्रेयो दिवि दुरवलभ्यं दिविषदाम्।।13।

पदार्चायां प्रीतिः प्रतिदिनमपूर्वा प्रभवतु। यथा ते प्रासयं प्रतिपलमपेक्ष्यं प्रणमताम्।।

अनल्पं तंमातर्भवति भृतभक्त्या भवतु नो। दिशातः सदभक्तिं भुवि भगवतां भूरि भवदाम्।।14।

मम सकलरिपुणां वाङ्मुखे स्तम्भयाशु। भगवति रिवुजिह्वां कीलय प्रस्थतुल्याम्।।

व्यवसितखलबुद्धिं नाशयाऽशु प्रगल्भां। मम कुरु बहुकार्यं सत्कृपेऽम्ब प्रसीद।।15।

व्रजतु मम रिपुणां सद्मनि प्रेतसंस्था। करधृतगदया तान् घातयित्वाऽशु रोषात्।।

सधनवसनधान्यं सद्म तेषां प्रदह्य। पुनरपि बगला स्वस्थानमायातु शीघ्रम।16।

करधृतरिपुजिह्वां पीडनव्यग्रहस्तां। पुनरपि गदया तांस्ताडयन्तीं सुतन्त्राम्।।

प्रणतसुरगणानां पालिकां पीतवस्त्रां। बहुबलबगलान्तां पीतवस्त्रां नमामः।17।

हृदयवचनकायः कुर्वतां भक्तिपुंजं। प्रकटति करुणार्द्रां प्रीणती जल्पतीति।।

धनमथ बहुधान्यं पुत्रपौत्रादिवृद्धिः। सकलमपि किमेभ्यो देयमेवं त्ववश्यम्।18।

तव चरणसरोजं सर्वदा सेव्यमानं। द्रुहिणहरिहराद्यैर्देववृन्दैः शरण्यम्।।
मृदुलमपि शरणं ते शर्म्मदं सूरिसेव्यं। वयमिह करवामो मातरेतद् विधयेम्।19।

फलश्रुति- बगलाहृदयस्तोत्रमिदं भक्तिसमन्वितः। पठेद् यो बगला तस्य प्रसन्ना पाठतो भवेत्।20।

पीताध्यानपरो भक्तो यः श्रृणोत्यविकल्पत। निष्कल्मषो भवेन्मर्त्यो मृतो मोक्षमवाप्नुयात्।21।

आश्विनस्य सिते पक्षे महाष्टम्यां दिवानिशम्। यस्त्विदं पठते प्रेम्णा बगलाप्रीतिमेति सः।22।

देव्यालये पठन्मर्त्यो बगलां ध्यायतीश्वरीम्। पीतवस्त्रावृतो यस्तु तस्य नश्यन्ति शत्रवः।23।

पीताचाररतो नित्यं पीतभूषां विचिन्तयन्। बगलां यः पठेन्नित्यं हृदयस्तोत्रमुत्तमम्।24।

न किंचिद्दुर्लभमं तस्य दृश्यते जगतीतले। शत्रवो ग्लानिर्मायान्ति तस्य दर्शनमात्रतः।25।

---

**श्रीमातंगी हृदय स्तोत्रम्–** विनियोग– ॐ अस्य श्रीमातंगीहृदय स्तोत्रमंत्रस्य दक्षिणामूर्ति ऋषिः, विराट् छन्दः, श्रीमातंगी देवता, ह्रीं बीजं, हूं शक्तिः, क्लीं कीलकं सर्ववांछितार्थसिद्धये पाठे विनियोगः।

षडंगन्यास– ॐ ह्रीं – अंगुष्ठाभ्यां नमः – हृदयाय नमः। ॐ क्लीं – तर्जनीभ्यां नमः – शिरसे स्वाहा। ॐ हूं – मध्यमाभ्यां नमः – शिखायै वषट्। ॐ ह्रीं – अनामिकाभ्यां नमः – कवचाय हुम् ॐ क्लीं – कनिष्ठिकाभ्यां नमः – नेत्रत्रयाय वौषट्। ॐ हूं – करतलकरपृष्ठाभ्यां नमः – अस्त्राय फट्।

ध्यानम्– श्यामांगी शशिशेखरं त्रिनयनां वेदैः करैर्बिभ्रतीं पाशं खेटकमथांकुशं दृढमसिं नाशाय भक्तद्विषाम्। रत्नालंकरण

प्रभोज्जवलतनुं भास्वत्किरीटां शुभां मातंगी मनसा स्मरामि सदयां सर्वार्थसिद्धिप्रदाम्।।

स्तोत्रम्- नमस्ते मातंग्यै मृदुमुदिततन्वै तनुमतां परश्रेयोदायै कमलचरण ध्यानमनसाम्। सदा संसेव्यायै सदसि पिबुधैर्द्दिव्यधिषणैर्द्दयार्द्रायै देव्यै दुरितदलनोद्दण्डमनसे।।

परं मातस्ते यो जपति मनुमव्यग्रहृदयः कवित्वं कल्पानां कलयति सुकल्पः प्रतिपदम्। अपि प्रायो रम्यामृतमयपदा तस्य ललिता नर्टीमन्या वाणी नटति रसनायां चपलिता।।

तव ध्यायन्तो ये वपुरनुजपन्ति प्रवलितं सदा मन्त्रं मातर्न हि भवति तेषां परिभवः। कदम्बानां मालाः शिरसि तव युन्जन्ति सदये भवन्ति प्रायस्ते युवतिजनयूथस्ववशगाः।।

सरोजैस्साहस्रैस्सरसिजपदद्वन्द्वमपि ये सहस्रं नामोक्त्वा तदपि तव डेन्तं मनुमितम्। पृथङ्नाम्ना तेनायुत कलितमर्चन्ति खलु ते सदा देवव्रातप्रणमितपदांभोजयुगलाः।।

तव प्रीत्यै मातर्द्ददति बलिमाधाय बलिना समत्स्यं मांसं वा सुरुचिरतम् राजरुचितम्। सुपुण्या ये स्वान्तस्तवचरणमोदैकरसिका अहो भाग्यं तेषां त्रिभुवनमलं वश्यमखिलम्।।

लसल्लोलश्रोत्राभरणकिरणक्रान्तिकलितं मितस्मित्यापन्नप्रतिभितममन्नं विकरितम् मुखाम्भोजं। मातस्तव परिलुठ्द्भ्रूमधुकरं रमा ये ध्यायान्ति त्यजति न हि तेषां सुभवनम्।।

परः श्रीमातंग्या जयति हृदयाख्यस्सुमनसामयं सेव्यस्सद्योभिमत फलदश्चातिललितः। नरा ये श्रृण्वन्ति स्तवमपि पठन्तीममनिशं न तेषां दुःप्राप्यं जगति यदलभ्यं दिविषदाम्।।

धनार्थी धनमाप्नोति दारार्थी सुन्दरीं प्रियाम्। सुतार्थी लभते पुत्रं स्तवस्यास्य प्रकीर्तनात्।।

विद्यार्थी लभते विद्यां विविधां विभवप्रदाम्। जयार्थी पठनादस्य जयं प्राप्नोति निश्चितम्।।

नष्टराज्यो लभेद्राज्यं सर्वसम्पत्समाश्रितम्। कुबेरसमसम्पत्तिः स भवेद्धृदयं पठन्।।

किमंत्र बहुनोक्तेन यद्यदिच्छति मानवः। मातंगीहृदयस्तोत्र पाठात्तत्सर्वमाप्नुयात्।।

---

**सद्य फलदाः लक्ष्मीस्तव हृदयम्- ध्यानम् -** हस्तद्वयेन कमले धारयन्तीं स्वलीलया। हारनूपुरसंयुक्तां लक्ष्मीं देवीं विचिन्तये।।

**स्तोत्र-** श्रीमत्सौभाग्य जननीं स्तौमि लक्ष्मीं सनातनीम्। सर्वकामफलवाप्ति साधनैकसुखावहाम्।।1।

श्रीवैकुण्ठस्थिते लक्ष्मि समागच्छ ममाग्रतः। नारायणेन सह मां कृपादृष्ट्यावलोकय।2।

सत्यलोकस्थिते लक्ष्मि त्वं समागच्छ सन्निधिम्। वासुदेवेन सहिता प्रसीद वरदा भव।3।

श्वेतद्वीपस्थिते लक्ष्मि शीघ्रमागच्छ सुव्रते। विष्णुना सहिते देवि जगन्मातः प्रसीद मे।4।

क्षीराब्धिसंस्थिते लक्ष्मि समागच्छ समाधवे। त्वत्कृपादृष्टिसुधया सततं मां विलोकय।5।

रत्नगर्भस्थिते लक्ष्मि परिपूर्ण हिरण्मयि। समागच्छ समागच्छ स्थित्वा सुपुरतो मम।6।

स्थिरा भव महालक्ष्मि निश्चला भव निर्मले। प्रसन्ने कमले देवि प्रसन्ना वरदा भव।7।

श्रीधरे श्रीमहाभूमे त्वदन्तस्थ महानिधिम्। शीघ्रमुद्धृत्य पुरतः प्रदर्शय समर्पय।8।

वसुन्धरे श्रीवसुधे वसुदोग्धे कृपामयि। त्वत्कुक्षिगत सर्वस्वं शीघ्रं मे तु प्रदर्शय।9।

विष्णुप्रिये रत्नगर्भे समस्तफलदे शिवे। त्वद्गर्भगत हेमादीन् सम्प्रदर्शय दर्शय।10।

अत्रोपविश्य लक्ष्मि त्वं स्थिराभव हिरण्यमयि। सुस्थिराभव सुप्रीत्या प्रसन्न वरदाभव।11।

Shri Raj verma ji
09897507933, 07500292413

सादरे मस्तके हस्तं मम तव कृपयार्पय। सर्वराजग्रहे लक्ष्मि त्वत्कलामयि तिष्ठतु।।12।

यथा वैकुण्ठनगरे यथैव क्षीरसागरे। तथा मद्भवने तिष्ठ स्थिरं श्रीविष्णुना सह।।13।

आद्यालक्ष्मि महालक्ष्मि विष्णुवामांकसंस्थिते। प्रत्यक्षं कुरु मे रूपं रक्ष मां शरणागतम्।।14।

समागच्छ महालक्ष्मि धनधान्यसमन्विते। प्रसीद पुरतः स्थित्वा प्रणतं मां विलोकय।।15।

दया सुदृष्टिं कुरुतां मयि श्रीः। सुवर्णवृष्टिं कुरु मे गृहे श्रीः।।16।

महालक्ष्मि समुद्दिश्य निशि भार्गववासरे। इदं श्रीहृदयं जप्त्वा शतवारं धनी भवेत्।।


---

## Books Written by Gurudev Shri Raj Verma ji

- Divya Mantra Sadhana Evam Siddhi




- Shri Baglamukhi Divya Sadhana



Shri Raj verma ji
09897507933, 07500292413